# संस्कृत-वार्ता:

**दिनाङ्क :**-24.06.2024
**प्रात:** - 06:55

<u>संसद्-सत्रं</u>

अष्टादश-लोकसभायाः प्रथमं सत्रं अद्य समारप्स्यते। अस्मिन् सत्रे, नवनिर्वाचितानां संसद्-सदस्यानां शपथ-ग्रहणं भविष्यति। भाजपेति दलस्य वरिष्ठ: सांसद: भर्तृहरि महताबः, यो नवलोकसभाया: प्रोटेम स्पीकर अर्थात् अस्थाई अध्यक्ष रूपेण कार्यं करिष्यति, स: नवनिर्वाचितानां संसद्-सदस्यानां शपथ-ग्रहणं कारयिष्यति। नूतन-लोकसभा-अध्यक्षस्य निर्वाचनं अस्मिन् मासस्य षट्-विंशति दिनांके भविष्यति एवं राष्ट्रपति-पदासीना द्रौपदी-मुर्मू: सप्त-विंशति-दिनांके संसदि लोकसभाय़ाः राज्यसभायाश्च संयुक्त-सत्रं संबोधयिष्यति।

अस्मिन् मासस्य सप्त-विंशति-दिनांके राज्यसभायाः सत्रं समारप्स्यते। संसदः सत्रमिदम् अग्रिम-मासस्य त्रिणि-दिनांके समाप्तं भविष्यति । अयं कार्यक्रमः अस्माकं अन्तर्-जाल-पटले newsonair.com अथ अस्माकं YouTube पटलस्य प्रवाहिकायां NEWS ON AIR OFFICIAL इत्यत्र अपि उपलब्धो भविष्यति।

**<u>गृहमंत्री / जलौघ:</u>**

गृहमन्त्री अमितशाहः निर्दिष्टवान् यत् उत्तमजलौघप्रबन्धनाय नदीनां जलस्तरस्य पूर्वानुमानप्रणल्याः उन्नयनाय च प्रयत्नं करणीयम्। नवदिल्ल्यां जलौघप्रबन्धनस्य सज्जतायाः समीक्षायै उच्चस्तरीयोपवेशनस्य अध्यक्षतां कुर्वन् श्रीशाहः देशे जलाप्लवस्य समाव्हानानि न्यूनीकर्तुं व्यापकिं दूरदर्शीम् च नीतिं निर्मातुं दीर्घकालिकोपायानाम् अपि समीक्षा कृतवान्। सः निर्देशं दत्तवान् यत् विद्युद्योतनसम्बद्धानि ऋतु विभागेन प्रसारितानि सञ्चेतनादीनि एसएमएस, टीवी, एफ़एम रेडियो इत्यादिभिः माध्यमैः जनसामान्यं प्रति प्रसारितव्यानि। श्रीशाह: अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे देशस्य आपदप्रबन्धनं शून्यं हानीति दृष्टिकोणेन अग्रे सरति। गृहमन्त्री भारतस्य ऋतुविभागं केन्द्रीयजलआयोगं च पूर्व जलौघ सञ्चेतना प्रसारणे प्रयुक्तानां सर्वेषां उपकरणानां पुनः मापनप्रक्रियाम् पूरयितुं उक्तवान्। उपवेशने जल शक्ति मंत्री सी.आर. पाटिल:, गृहराज्यमन्त्री नित्यानन्दराय: तथा विभिन्न-मन्त्रालय-विभागसचिवाः भागं गृहीतवन्तः।

अधुना झारखण्ड, हिमाचलप्रदेश, सिक्किम इत्यादिषु विभिन्नेषु राज्येषु भूस्खलन-जलप्रलय-सम्बद्धाः बहव्यः घटनाः अभवन् । सम्प्रति असमदेशे जलौघस्य स्थितिः अस्ति। अनेकेषु मण्डलेषु लक्षाः जनाः प्रभाविताः अभवन् । गतमासे त्रिपुरे रेमाल-चक्रवातेन महती क्षतिः अभवत् ।

**<u>कोलकाता-एसटीएफ</u>**

विशिष्ट-कार्य-दल एस.टी.एफ. इत्यनेन अथ पश्चिम बंगाल आरक्षि दलेन ह्य: ‘शहादत’ इति नाम्नः आतंकवादी-समूहः निगडितः। 'शहादत’ इति आतंकवादी-समूहः बांग्लादेशे सक्रिय: प्रतिबंधित-आतंकवादी-समूह: अंसार अल इस्लामस्य आनुषंगिक-संघटनं अस्ति। ध्यातव्य अस्ति, यत् अंसार-अल-इस्लामस्य संबंधः कुख्यात-अंताराष्ट्रिय-आतंकवादी-समूह अल-कायदा इत्यनेन साकं अस्ति। ‘शहादत’ आतंकवादी-समूहस्य प्रमुख: मुहम्मद हबीबुल्लाह: गतरात्रौ पश्चिम-बर्धमान जनपदस्य कांकसा-क्षेत्रात् निगडित: जात: । अस्य समूहस्य उग्रवादिनः भारते बांग्लादेशे च विभिन्नेषु उपद्रव-गतिविधिसु सक्रियाः सन्ति।

**क्रिकेट्**

अद्य आई.सी.सी. विंशति प्रति विंशतिः विश्वचषकक्रिकेट् प्रतिस्पर्धायाम् उत्कृष्ट-अष्ट-चक्रे भारत-आस्ट्रेलियादेशयो: मध्ये प्रतिस्पर्धा सेंट-लूसियायां ग्रॉस आइलेट इत्यत्र डैरेन सैमी अन्ताराष्ट्रिय क्रिकेट-क्रीडाङ्गणे भविष्यति। स्पर्धाया: प्रसारणं भारतीय समयानुसारं सायं अष्टवादने भविष्यति।

**।।इति वार्ता:।।**